**उद्घाटकः-** नवनारायण वन्द्योपाध्यायः
**निर्देशकः-** विद्वान् वेङ्कटरमणभट्टः, प्राध्यापकः संस्कृतविभागस्य।
**सम्पादकः-** पङ्कजराउलः, स्नातकोत्तरद्वितीयवर्षीयः।
**आलंकारिकः-** बुद्धदेवघोषः, स्नातकद्वतीयवर्षीयः।
**वर्षम्:-** ३
**अङ्कः-** १२(चैतन्यमहाप्रभुः)
**प्रकाशनदिनाङ्कः-** १६/०१/२०१८
**वासरः-** मङ्गलः

## सम्पादकीयम्

भारतीयवाङ्मये दृश्यन्ते षड् आस्तिकदर्शनानि।षड्सु आस्तिकदर्शनेषु वेदान्तदर्शनमेव अन्यतमम्। तस्य वेदान्तदर्शनस्य सन्ति अवान्तरभेदाः। तेषु अचिन्त्याभेदाभेदवादः प्रमुखस्थानमधिकरोति। तस्य अचिन्त्याभेदाभेदवादस्य प्रवर्तकोऽयम्t चैतन्यमहाप्रभुः। वैष्णवधर्मस्य भक्तियोगस्य परमप्रवक्ता तथा भक्तिकालस्य प्रमुखकविषु अन्यतमः महाप्रभुः श्रीचैतन्यदेवः।चैतन्यचरितामृतानुसारेण भगवतः श्रीचैतन्यस्य जन्म षडशित्यधिक-चतुर्दशशततमे ईशवीयाब्दे (१४८६)फल्गुनमासस्य शुक्लपुर्णिमायां पश्चिमबङ्गस्य नवद्वीपे अभूत्।यद्यपि बाल्यावस्थायां अस्य नाम विश्वम्भर आसीत् तथापि निमाई गौराङ्ग इत्यादिनाम्नैव तस्य प्रसिद्धिः जाता। तस्य अनुयायिनः तं भगवतः श्रीकृष्णस्य अवतारं मन्यन्ते। भगवतः श्रीगौराङ्गावतारस्य श्रेष्ठत्वप्रतिपादकाः चैतन्यचरितामृतम्, चैतन्य-भागवतम्, चैतन्यमङ्लम् इत्यादयः अनेके ग्रन्थाः विद्यन्ते।अष्टभिः संस्कृतश्लोकैःविरचितं शिक्षाष्टकम् इत्येका एव कृतिः अस्य प्राप्यते।भगवतः श्रीकृष्णस्य गुणकीर्तनमेव तस्मिन् विहितम्।तन्मते जगति अस्मिन् कृष्णलीला एव शाश्वती ।भक्तिप्रेम एव तस्य मूलशक्तिः, सैव आनन्दकारणम् इति।श्रीचैतन्यप्रवर्तितस्य हरे कृष्ण हरे राम इति महासंकीर्तनस्य माहात्म्यम् अस्माकं हृदि लभतां प्रतिष्ठाम् इति संप्रार्थ्य भगवान् श्रीचैतन्यमहाप्रभुः इति विषयम् आधारीकृत्य इदं निवेदनम् अस्माभिः विहितम्।तदिदं सहृदयहृदयेषु प्रीतिं जनयेत् इत्याशा।

# श्रीचैतन्यदेवेन साकं वल्लभाचार्यः

राजेशअधिकारी ,स्नातकतृतीयवर्षीयः

वन्दे श्रीकृष्णचैतन्यं कृष्णभावामृतं हि यः।
आस्वाद्यास्वादयन् भक्तान् प्रेमदीक्षामशिक्षयत्।।

शास्त्रोक्तं मतं शिष्टानुशासनं चेत्युभयं व्यतिरिच्य श्रेयोमार्गगमनं दुष्करमेव इत्यतः प्राचीनसिद्धान्तेषु शिष्टव्यवहारेषु च श्रीचैतन्यदेवस्य महती प्रीतिः आसीत्। स यत्रैव गच्छति तत्रैव पण्डितैः साकं शास्त्रार्थनिरतो भवति। एवमेव प्रयागे एकदा वल्लभभट्टाख्येन पण्डितेन साकं तस्य साक्षात्कारो जातः। तत्र चैतन्यदेवस्य भक्तिं भगवत्तत्त्वावबोधं तदीयालौकिकीं भावावस्थां शास्त्रालोचनकौशलादिगुणांश्च प्रेक्षं प्रेक्षं तदीयगुणराशिभिः समाकृष्टो जातः वल्लभभट्टः।

पुर्यां रथयात्रावसरेऽपि चैतन्यदेवस्य सङ्गः प्राप्तोऽनेन। तदानीम् अयं पण्डितः चैतन्यदेवस्य समक्षं स्वयं किमपि स्त्रष्टुं कृतसङ्कल्पः। अतस्तदनुसारं स श्रीमद्भागवतोपरि टीकां रचयामास। परन्तु अत्रैव समस्या जाता। चैतन्यदेवः श्रीधरस्वामिना कृतां टीकां प्रामाण्यरूपेण स्वीचकार। तन्मते श्रीधरस्वामिना एव श्रीमद्भागवतस्थान् सुकठिन-शब्दपटलान् सरलीकुर्वता श्रुतिस्मृतिभ्यां सोदाहरणं रुचिपूर्णा टीका व्यरचि। शङ्कराचार्यभगवत्पादानाम् अद्वैतवादमेव समाश्रित्य प्रवर्तितेयं टीका। अतः चैतन्यदेवः स्वयं तदीयशिष्याः अपि एनामेव टीकां सम्प्रदायानुमोदितां मेनिरे।अपरत्र वल्लभाचार्येण शाङ्करः अद्वैतवादो न स्वीचक्रे। अयं तु श्रीधरीं टीकां खण्डयन्नेव स्वमतानि प्रस्तोतुं प्रवृत्तः। अत एव श्रीचैतन्यदेवः तच्छिष्याश्च वल्लभाचार्यस्य टीकां नैव शुश्रुवुः। तदा स्वटीकां प्रचारयितुमनेन उपायान्तरं समाश्रितम्। ग्रन्थमाहात्म्यं यद्यपि सर्वैः तिरस्कृतं तथापि श्रीचैतन्यदेवेन तच्छिष्यैश्च साकं समारब्धे भगवत्प्रसङ्गे वल्लभाचार्यः स्वीयग्रन्थप्रतिपाद्यानि तत्त्वानि प्रचारयितुमचेष्टत। किन्तु हा, तदपि युक्तिवारिप्रवाहे तृणायमानं बभूव।

सर्वत्रैव स्वावमाननं प्रेक्ष्य तेन चैतन्यभक्तः गदाधरपण्डितः तद्ग्रन्थश्रवणायानुरुद्धः । महापण्डितोऽपि विनयी कोमलस्वभावोऽयं गदाधरः श्रीचैतन्यदेवस्य विरुद्धमेतदिति विजानन्नपि, वल्लभभट्टस्य अन्तिमानुरोधं प्रत्याख्यातुमिच्छन्नपि, भट्टचेतः समाश्वासयितुं ग्रन्थं शुश्राव। परन्तु विज्ञातसर्वस्वे क्रुद्धे श्रीचैतन्यदेवे गदाधरः बल्लभाचार्यं तत्याज। उपायान्तरमप्राप्य श्रीचैतन्यदेवमेव स्वमानसिकीम् अवस्थां प्राकटयदयम्। तदा श्रीचैतन्यदेवेन समाश्वासितोऽयं पण्डितः – "पण्डितेषु अहङ्कारो न युज्यते। सम्प्रदायमननुसृत्य शिष्टानुशासनं च खण्डयित्वा स्वच्छन्दं शास्त्रव्याख्यानं स्वौद्धत्यस्यैव

प्रकाशकम्।"इति। एवमेव स्वभ्रान्तिं विजानन् वल्लभाचार्यः श्रीचैतन्यदेवस्य वचनामृतं पायं पायम् एकदा चैतन्यदेवाद् दीक्षाग्रहणेच्छुः सञ्जातः। परमकारुणिकात् चैतन्यदेवात् समित्पाणिः अयं शिष्यः युगलकिशोरमन्त्रे दिक्षां प्राप्य निष्कामप्रेम्णः भक्तिमार्गस्य च उपासको बभूव। एवमेव भट्टसदृशाः अन्येऽपि बहवः पण्डिताः श्रीचैतन्यदेवस्य शरणापन्नाः सन्तः ऐहिकपारलौकिकदुःखदैन्यादीन् अपससुः।

चैतन्यस्य श्रीकृष्णोपरि पूर्णा श्रद्धा आसीत्। भगवतः कृष्णस्य भजनं कुर्वन् भक्तिचिन्तनेन एकाग्रचित्तो भवति स्म।कृष्णलीलया भक्तिसाधनायां तस्य वैराग्यः क्रमेण वर्द्धितः सन् सन्यासग्रहणे तस्य इच्छा प्रबला जाता।सन्यासग्रहणकाले गुरुणा तस्य नाम श्रीकृष्णचैतन्य इति प्रदत्तम्, अग्रे यद् चैतन्यमहाप्रभुः इति नाम्नैव प्रसिद्धं जातम्। चैतन्यदेवः सर्वान् भक्तान् वदति स्म यद् श्रीकृष्णस्य नामस्मरणमेव अस्माकम् एकमात्रजीवनावसानम्।कृष्णभक्तिरेव पारमार्थिका इति। सर्वेषामपि शास्त्राणां सारः श्रीकृष्णभगवानेव अस्य चराचरविश्वस्य आधारः इति ।श्रीचैतन्यभक्तिप्रवाहः बङ्गदेशे प्रतिकोणं प्रवाहितः सन् जातिधर्मवर्णनिर्विशेषं सर्वेषां चेतसि अमृतवारि सिषेच। अत एव खलु श्रीरामकृष्णपरमहंसेनापि भणितम्- चैतन्यदेव भक्तिर अवतार, जीवके भक्ति शिखाते एसेछिलेन। (चैतन्यदेवः भक्तेरवतारः, जीवेभ्यः भक्तिमुपदेष्टुवतीर्णः) ।। श्रुतिस्मृतिविहितं सनातनवैदिकधर्मानुष्ठानं तत्प्रचारं च विधाय चैतन्यदेवः धरायां सनातनवैजयन्त्याः उड्डयने आजीवनं चेष्टयामास। समाजे स्थित्वाऽपि सः भगवद्भावे एव सदा विराजते। भावस्य परमसीम्नि राजमानोऽयम् अत एव सगौरवमाह –

न धनं न जनं न सुन्दरीं कवितां वा जगदीश कामये |
मम जन्मनि जन्मनीश्वरे भवताद् भक्तिरहैतुकी त्वयि ||

## भक्तरूपो भक्तवत्सलः

प्रीतमबेरा,स्नातकद्वतीयवर्षीयः

स्वभक्तचित्तनन्दनाय भक्तचेतःस्थकल्मषहरणाय उन्मार्गगामिभक्तानां सन्मार्गे प्रत्यावर्तनाय सत्ययुगात् विविधरूपेण मर्त्यधाम्नि अस्मिन् अवतेतीर्यत भगवान्। कृपाजलधरभगवतः कृपावारिवर्षणेन भक्तस्य हृदयसरसि पूर्णे सति तस्मिन् भक्त्यरविन्दं प्रस्फुटति, तदा लोलुपमधुकरवत् भक्तवत्सलः भगवान् हृदयकमलस्य प्रेममधु पिपासुः मर्त्यधाम्नि अवतरति। परम्परामिमाम् अनुसरन् कल्यभिधेये तूरीययुगेऽस्मिन् संसारसागरतटं प्रापकैकोडुपं भक्तिं निखिलमनुष्येषु प्रचिचरिषुः वङ्गप्रदेशस्य

नदीयाभिधेयनगरे जगन्नाथमिश्रमहोदयात् शचीमातुः गर्भे भक्तवत्सलः भगवान् स्वयं भक्ततनुम् आशिश्रिये। पितृप्रदत्तनाम्ना विश्वम्भरः अयं मात्रा सादरं निमाइ-इत्याख्यया आहूयते स्म। भगवति निःस्वार्थानुरागात् अयं चतुर्विंशतिवत्सरवयसि वृद्धमातुः शचीदेव्याः पत्न्याः विष्णुप्रियायाश्च प्रेमपाशं छिदन् सन्न्यासाश्रम् अङ्गीचकार। सन्न्यासानन्तरं स श्रीचैतन्यदेवनाम्ना भक्तैः अभिधीयते स्म।

पूर्ववङ्गे भ्रमणकाले ब्राह्मणाद्युच्चवर्णीयानां जात्यभिमानः पाण्डित्यगर्वः वृथातर्केण आयुक्षयः, अपि च शूद्रादिनिम्नवर्णीयानाम् अज्ञानम् अस्पृश्यता-इत्याकारिकां समाज-दुरवस्थां दर्शं दर्शम् एवं च विजातीयानाम् अपि सनातनधर्माग्रहं च अवलोक्य चैतन्यदेवस्य अक्षिणी बाष्पावृते संवृत्ते। हरिनामसङ्कीर्तनमेव समाजव्याधेरस्य परमौषधमिति निश्चित्य हरिनाममधुपानमत्तः भूत्वा स्वमधुरकण्ठेन सभक्तगणं नग्नचरणः पथिषु अटन् हरिनामप्रचारम् आरेभे। पूरीधाम्नि निवासकाले महाप्रभुः पुण्यधाम्नः अस्य महिमानम् उपालभत। श्रीश्रीजगन्नाथदेवं स स्वेष्टदेवताद्वारकानाथरूपेण अनुभूतवान्। प्रत्यहं प्रातः जगन्नाथमन्दिरगमनं तस्य प्रथमं प्रधानं च कर्तव्यम् आसीत्। स्नानयात्रायाः परं मन्दिरद्वारपिधानानन्तरं जगन्नाथदेवस्य अदर्शनात् पूरीवासः तस्मै अधिकं व्यथयति स्म। जगन्नाथदेवोपरि तदीयायाः अहैतुकीभक्तेः परिचयः वयं तद्विरचितजगन्नाथा-ष्टकस्तोत्राध्ययनेन उपलभामहे।

"युगायितं निमिषेण चक्षुषा प्रावृषायितम्।
शून्यायितं जगत्सर्वं गोविन्दविरहेण मे।।"

भगवद्विरहेण एवं व्याकुलता शतान्वेषणेनापि अत्यन्तसुदुर्लभ एव। भक्तेः चरमपर्यायस्यानुभवः तस्मै प्रतिक्षणं पीडयाञ्चकार। सन्न्यासग्रहणस्य आदिमद्वादशवत्सरं परिव्राजकरूपेण जनानां द्वारेषु भ्रमणेन हरिनामवितरणेन च व्यतीतानि अनेन, अन्तिमद्वादशवर्षेषु अयं भक्ततल्लजः भक्तिमार्गस्य चरमसाध्यभूतं गोपीप्रेम स्वयम् आस्वाद्य निखिलजगति प्रचारयाञ्चकार। श्रीकृष्णदेवस्य मथुरागमनानन्तरं श्रीमतीराधायाः चेतसि यादृशी व्याकुलता समुदिता आसीत्, तादृशः भावः सम्प्रति चैतन्यप्रभोः मानसे अस्फुरत्।

महाप्रभुः भावविह्वलो भूत्वा श्रीश्रीजगन्नाथदेवम् आलिलिङ्ग्य तस्मिन्नेव विलीनो जातः इति।।

# बङ्गजनमणिः श्रीचैतन्यमहाप्रभुः

बुद्धदेवघोषः,स्नातकद्वतीयवर्षीयः

आजानुलम्बितभुजौ कनकावदातौ
संकीर्तनैकपितरौ कमलायताक्षौ।
विश्वम्भरौ द्विजवरौ युगधर्मपालौ
वन्दे जगत्प्रियकरौ करुणावतारौ।।

महामहोपाध्यायैः हरप्रसादशास्त्रिभिः प्रोक्तमासीत् - चैतन्यदेवः एव श्रेष्ठबङ्गीयः इति। अस्मिन् काले बङ्गभूमेः बहुत्र शब्दबन्धः एकः प्रचतिलः "न्याकाचैतन्यः" इति। वस्तुतः नारीजनोचितलज्जानम्रतास्वभावयुक्तस्य पुरुषोचितशौर्यादिविहीनस्य युवकस्य कृते व्यङ्गं कुर्वन् एवम् उच्यते। तत्र महाप्रभुचैतन्यस्यैव नाम गृहीतमस्ति।बहूनामेवमेव अभिमतमस्ति यत् श्रीचैतन्यस्य भगवद्भजनरूपधर्मः तद्धर्मग्राहिणः तमोगुणाच्छन्नान् अप्रापयत्। एवमेव बहुभिः आक्षेपाः क्रियन्ते अस्य महामानवस्य विषये। प्रथमतः- स तु आजीवनम् अतिभावपरिवृतक्रन्दनरूपधर्ममेव प्रचारितवान् इति नव्ययुवकानाम् आक्षेपः। द्वितीयतः- यद्यपि सः शङ्कराचार्यकृतदशनामीसम्प्रदायस्थः सन्न्यासी आसीत् तथापि सः सम्प्रदायमतम् आचरणविधिं च अस्वीकृत्वा स्वमतमेव अप्रचारयत्। तृतीयतः- स्वसम्प्रदाये स्त्रीपुरुषाणां समेषां ग्रहणं कृत्वा सः तु समाजविधिम् उल्लङ्घितवान्। अधुना अस्माभिः तस्य महज्जीवनं पठित्वा तु अन्यत् किमपि अनुभूयते। क्रन्दनरूपधर्मः इत्युक्ते चैतन्यमहाप्रभोः भावप्रवणतया ईश्वरस्य नाम्ना ज्ञानराहित्यमेवात्र आक्षिप्तम्, इदमनुचितम्। यतो हि एतत् धर्मजीवने अपेक्षितमेव। अस्यैव नामास्ति व्याकुलता। न केवलं धर्मजीवने अपि तु यस्मिन् कस्मिंश्चित् साधनक्षेत्रे तस्य साधनस्य सूक्ष्मभावः यदा परिपक्कः भवति तदा हृदयद्रवत्वात् एवं भवत्येव इति तु ज्ञायते एव। अतः सः वीरः एव आसीत्। पाठसमये पाण्डित्ये पितुः जीवनावसानात् परं संसारकार्यनिर्वाहे सन्न्यासग्रहणात् परं बङ्गदेशस्य तत्कालीनम्लेच्छशासकानां अत्याचारं प्रति आन्दोलनसमये भगवन्नामोच्चारणसमये हृदयाकुलितनिनादे अपि तस्य शौर्यादिमत्त्वं प्रतिफलति। अधुना स्त्रीमात्रोः प्रतिपालनविषये अपि यदुच्यते तदपि वृथाभूतम्। सः तु तयोः अनुमतिं स्वीकृत्य एव जनहिताय सन्न्यासम् अग्रहीत्। द्वितीयतः सः बाह्यतः एव सन्न्यासी आसीत्। आचार्यसम्प्रदायस्य मतमपि स्व्यकरोत्। किन्तु अत्र एवं वक्तव्यम् आपतति यत् स आचार्यसम्प्रदायस्य सन्न्यासिभिः साकं यद्यपि मेलनादिकं न कृतवान् तथापि आजीवनं भिक्षान्नमात्रेण यथार्थसन्न्यासजीवनम् अयापयत्। नित्यानित्यवस्तुविवेकवान् इहा-मुत्रफलभोगवैराग्ययुक्तः शमदमादिषङ्क-सम्पत्तिवान् मुमुक्षतासम्पन्नः स आसीत्।

सोऽपिशङ्कराचार्यवत् जगत्कारणप्रसङ्गे 'अद्वयज्ञानतत्त्ववस्तु' इत्येव अङ्गीकरोति। भक्तभगवतोः अयं द्वैतसाधनप्रसङ्गस्तु लौकिकजीवने धर्मप्रवाहं विकासयति। यतो हि भोगयुक्तजीवानां तु ब्रह्मतत्त्वज्ञानात् पूर्वं शरणागतिः अपेक्षिता भवति। तस्मादेव गीतायाम् उक्तं-

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। इति।

अपि च इदं दर्शनं समेषां लोकानां कृते सुलभमपि वर्तते। यतो हि तस्य मतमासीत् - "अद्वयतत्त्ववस्तु, कृष्णस्वरूपं, ब्रह्मात्मभगवत्तत्वम् इति रूपत्रयं तस्यैव रूपान्तरमात्रम्"(श्रीचैतन्य.आदिलीला.द्वितीयः)। अत्र नारीभ्यः शुद्रेभ्योऽपि यथेच्छ-प्रवेशाधिकारं प्रदत्तवान् श्रीचैतन्यदेवः। अपि च सत्यमिदं यत् महाप्रभुः धर्मप्रचारसमये जातिधर्मवर्णानां भेदं न कृतवान्। तस्मादेव स्वसम्प्रदाये कठोरनियमकारणात् शिष्येण एकेन स्त्रियां प्रति कामपूर्णदर्शने कृते सति सः तु तं तिरष्कृतवान् इति ज्ञायते। तस्य धर्ममते उदारता आसीत् किन्तु नासीत् उच्छृङ्खलता। धर्मप्रचारसमये बङ्गदेशे श्रृङ्खलाबोधः, संस्कृतेः उन्मेषः, गीतसाहित्यानाम् उद्भवनं, सर्वमेव तस्य महद्दानं वर्तते। येन दानेन परिपुष्टबङ्गः अधुनापि शिल्पकृषिसंस्कृतिसभ्यतारुचिबोधेषु भारतश्रेष्ठः जातः। अपि च निम्नजातीनामपि प्रवेशाधिकारं प्रदाय सः तु तस्य उदारतायाः परिचयमेव प्राकाशयत्। यतो हि समेषां हृदये एव भगवान् अस्ति तेन जातिवर्णविचारः कथम्। गीतायामपि एवमेव उक्तम्- ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठतीति। तन्मते तु कर्मभिरेव जातिविभागः, धर्मे तु समेषां ग्रहणम् इति। यदि च पापं तेषामस्ति तर्हि जपनामद्वारैव तस्य परिहारः तेन ते अपि भगवच्चरणाश्रिताः भवेयुः इत्येव तस्य आशयः आसीत्। शास्त्रस्य प्रयोगिकमूर्तिरासीत् सः महाप्रभुः। भारतीयसंस्कृतेः मूलमेव आसीत् वसुधैव कटुम्बकमिति। यद्यपि अनेनैव कारणेन बहुधर्मभ्रान्ताः वैष्णवं प्रति कटाक्षं कुर्वन्ति यत् -'जात खोयाले वैष्णव हय' (अर्थात् धर्मे नष्टे वेष्णवः भवति) इति।।

# चैतन्यभागवतानुसारं श्रीचैतन्यचरितम्

शुभङ्करदासः,स्नातकतृतीयवर्षीयः

अशेषलोकशोकनाशाय कलिमलौघविनाशाय राधाप्रेमसरोरुहे लोकाननुस्नावयितुं जगत्यवततार जगदीश्वरः चैतन्यमहाप्रभुरूपेण। तज्जीवनालोकालोकितं ग्रन्थद्वयं सहृदयहृदये रससम्भारं प्रस्तुते तद्धि चैतन्यभागवतम्, चैतन्यचरितामृतञ्च। तत्रवृन्दावनदासस्य चैतन्यभागवतं प्रामुख्यं भजते चैतन्यावतारस्य बाललीलारसरञ्जने। तत्र बाहुल्येन भगवतः चैतन्यदेवस्य चतुर्विंशतिवर्षपर्यन्तं वर्णना विहिता।

दास्यसख्यमाधुर्यवात्सल्यादिभावाः सम्यग् परिस्फुट्यन्ते भगवतो जीवने। मात्रा सह वात्सल्यस्नेहे, अग्रजेन सह प्रीत्याम्, मुरारिगुप्तेन सह परिहासे, दीनजनानां सहानुभूतौ च तस्य मानवीयरूपं प्रस्फुटितं चैतन्यभागवते। प्रकृते चैतन्यभागवद्वर्णितं बालचैतन्यचरितं स्वल्पशो विव्रियते।

बाल्ये सः निमाईनाम्ना प्रख्यातः आसीत्। यदा पाठशालायाः गृहं प्रत्यायाति तस्मिन् ग्राम्यशिशोः चित्रं प्रतिभाति स्म। तथाहि उक्तं चैतन्यभागवते -

धूलाय धूसर प्रभु श्रीगौरसुन्दर।
लिखन कालिर किछु शोभे मनोहर।। इति।

एकदा स बाल्यावस्थायां क्रन्दितुमारभत। बहवः तं शान्तयितुम् अचेष्टत। तदा सः विष्णुपूजायै निर्मितं नैवेद्यं स्वीकर्तुम् आभिलषत्। चैतन्यदेवः शास्त्रचर्चायामपि अत्यन्तं निष्णात आसीत्। अत एव छात्रान् दृष्ट्वैव सःतान्

शास्त्रोक्तान् विषयान् पृच्छति स्म। ततः छात्राः तं दृष्ट्वा दूरात्पलायन्ते -

मुकुन्द याइवेन गङ्गा स्नान करिवारे।
प्रभु देखि आड़े पलाइल कत दूरे।।
देखि प्रभु जिज्ञासेन पड़ुयार गणे।
ए वेटा आमारे देखि पलाइल केने।। इति।

अपि चासीत् मुकुन्दमुरार्योः उपरि निमाइपण्डितस्य आक्रोशः। गङ्गादासपण्डितस्य टोले निमाइमुरार्योः अत्यन्तं कलहः आसीत्।

श्रीचैतन्यानुरागिषु शुक्लाम्बरब्रह्मचारिणः श्रीधरस्य च स्निग्धं हृद्यञ्च वर्णना वर्तते वृन्दावनदासस्य वर्णनायाम्।

शुक्लाम्बरब्रह्मचारी दरिद्रो ब्रह्मण आसीत्। एकदा महाप्रभुः बलात् तद्धस्तात् भिक्षान्नं स्वीकुर्वन् अभुङ्क्त।

क्रियामध्ये श्रीगौराङ्गः मध्ये मध्ये काजिदलनस्य गृहं गत्वा तस्य पात्रेन जलं पीतवान्। गोविन्ददासः प्रमाणयति -

भक्त प्रेम वोझाइते श्रीशचीनन्दन।<br>
लौहपात्र तुलि लइलेन ततक्षण।।<br>
जल पिये महाप्रभु सुखे आपनार।<br>
कार शक्ति आछे ताहा नय कहिवार।। इति।

एवम्प्रकारेण सः जातिभेदं न्यक्कृतवान्।।